श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीदेवराजगुरुवर्यानुगृहीतम्

# ॥ अमृतफलावलिशतकम् ॥

## (घटिकाद्रिनाथशतकम्)

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ अमृतफलावलिशतकम् ॥

श्रीवेङ्कटार्चरणौ शिरसि करोमि स्मिताब्जसुहृदौ तौ।
पृथुतरमपि भवजधिं पिबतितरां यत्परागपरमाणुः॥ १ ॥

व्यत्यस्तचरणकमलां विनिहितभुजयुगळमित्रजानुयुगाम्।
विलसितरथाङ्गशङ्खां व्यक्तिमुपासे विरुद्धजातिमतीम्॥ २ ॥

श्रित घटिकाचलशृङ्गं शीतलकरुणातरङ्गितापाङ्गम्।
मनसि ममोल्लसदङ्गं वस्तु महः किमपि वाससा पिङ्गम्॥ ३ ॥

कलितदनुतनयभङ्गं करकमलाभरणवारिजरथाङ्गम्।
कृतघटिकाचलसङ्गं किमपि महो जयति केतनविहङ्गम्॥ ४ ॥

सर्वरसगन्धभरितम् सङ्गतमेकमपि सकलशाखासु।
अमृतफलमखिलपुंसामास्वाद्यं चित्रमस्ति घटिकाद्रौ॥ ५ ॥

आरण्यकाप्तवाक्यैरवगम्यो ग्राम्यजनदृशामपदम्।
स्फुरति घटिकाचलाग्रे पुरुषमृगः कोऽपि पुण्यकृदुपेयः॥ ६ ॥

महति घटिकाद्रिविषये महता स्नेहेन निर्मलदशायाम्।
देदीप्यते स्थिरोऽयं दिव्यैर्मुनिभिः प्रवर्तितो दीपः॥ ७ ॥

मुष्णंस्तमो जनानां मूर्धनि घटिकाचलस्य सम्भूतः।
आलोकतोऽखिलार्थानधिगमयति नित्यमच्युतो दीपः॥ ८ ॥

रस्यं सकृदुपसेव्यं लभ्यमपथ्यसहमसहितममोघम्।
त्वरितं हरति भवार्तिं शुद्धं घटिकाद्रिमौलिजं मूलम्॥ ९ ॥

स्थिरशोकशल्यहरणं जगतां विच्छिन्नकुशलसन्धानम्।
सञ्जीवनमपि घटिकाशैलजमूलं करोति सारूप्यम्॥ १० ॥

www.prapatti.com

अतिबलभवाहिदष्टान् अभिलाषविषाग्निमुर्च्छनानष्टान्।
घटिकाशिखरिनरेन्द्रो घटयत्यसुभिः कटाक्षमात्रेण॥ ११ ॥

चोरं स्वतश्च्युतं मां स्वामी घटिगाद्रिपो विचिन्वानः।
दृष्ट्वा कुतोऽप्युपायात् दृप्तमबध्नात् दयागुणेन दृढम्॥ १२ ॥

विमलकविसेव्यमाना विलसति सन्निहितशङ्खचक्राब्जा।
काऽपि घटिकाद्रिशिखरे करुणारसपूरनिर्भरा सरसी॥ १३ ॥

निर्मुक्तभोगशुद्धान् नित्यमहीनान् वहन् निजासक्तान्।
भाति घटिकाद्रिशिखरे भद्रश्रीः कोऽपि परिमळः शाखी॥ १४ ॥

करुणामृतरसवर्षैर्घटिकाचलघटिकालमेघ निजैः।
संसरणतरणितप्तं सञ्जीवय विनतसस्यजालमिदम्॥ १५ ॥

विमलतरभक्तिपूरे व्यपगतपङ्के विकस्वराम्बुरुहे।
मानससरसि मुनीनां रमते घटिकाद्रिराजहंस भवान्॥ १६ ॥

स्तम्भो हि विघ्नकारी संदृष्टो जगति सर्वकार्येषु।
दानवविदारणे ते तस्यैव हरे कथं नु साचिव्यम्॥ १७ ॥

देवत्वमागमात् ते सिद्धं तिर्यक्त्वमपि नरत्वेन।
सह दृष्टमद्य घटिकास्थावरसर्वात्मकस्य किमयुक्तम्॥ १८ ॥

पञ्चास्य एव हि त्वं प्रथितो भगवन् कथं सहस्रास्यः।
घटिकाद्रिपक्षपातिन् ख्यातोऽसि कथं च विश्वसाक्षीति॥ १९ ॥

बहुदेशमल्पदेशादपि सिंहत्वादधःस्थितं पुंस्त्वम्।
मूर्तौ तवात्र नृहरे मुख्यः को वाऽवगम्यतेऽन्येन॥ २० ॥

पुंसूक्तपूर्वकैस्तैः पुरुषत्वं मुख्यमेव ते विदितम्।
कथमियममुख्यताऽस्मिन् घटते घटिकाद्रिमनुजमृगराज॥ २१ ॥

विदधति न भाग्यलक्ष्मीविरहविलासात्तविकृतयो मनुजाः।
श्रवणामृतेषु घटिकाशैलवनप्रिय वचस्सु ते श्रद्धाम्॥ २२ ॥

कार्यं हिरण्यहरणं घटिकाचललुब्ध कंसमुख्यहरणं वा।
अहरस्त्वमाश्रितानां हन्त किमखिलान्यनर्थजातानि॥ २३ ॥

दोषा ममान्तरहिताः स्वामिन् घटिकेन्द्र तावकाश्च गुणाः।
तदपि गुणैस्त्वदुपघ्नैः स्थाने हीनाश्रिता जिता दोषाः॥ २४ ॥

पादाम्बुजेन लसता प्रसृमरमधुना परार्ध्यगन्धेन।
श्रयतां शमयसि घटिकाशैलप विपरीतवासनाः सकलाः॥ २५ ॥

प्रगुणा परं प्रसादं प्राप्ता निपुणेन पदविदा ग्रथिता।
सुतरां त्वयैव घटिकानायक शोभेत सूक्तिहारलता॥ २६ ॥

सरससुमनोऽभिरामा साधु च संस्कारसंभृतोल्लासा।
समुपैति सूक्तिलतिका सङ्गादमृतफल तव हि साफल्यम्॥ २७ ॥

सत्पक्षपातसुभगं सन्मानसरसिकम्बुजासक्तम्।
भुवनाश्रयं विशुद्धं बुध्ये घटिकावनौकसं हंसम्॥ २८ ॥

सुमनोरसकृतसङ्गं स्वरणविशेषेण तोषितानङ्गम्।
कमलालयान्तरङ्गं कलये घटिकाद्रिकल्पतरुभृङ्गम्॥ २९ ॥

दुर्गतिदुःखितचित्तान् दुष्करयोगान् विमुच्य सुखसेव्याम्।
प्राज्ञाः प्रयान्ति नित्यां निभृतिं घटिकाद्रिभूपमालम्ब्य॥ ३० ॥

कलयन्ति नैव सन्तः कापुरुषद्वारि वारणाकदनम्।
घटिकाशिखरिमुकुन्दं कमपि निधिं सुलभमनवधिं लब्ध्वा॥ ३१ ॥

मकरमयकूर्मरूपं वरशङ्खं पद्ममपि महापद्मम्।
कुन्दमसितं मुकुन्दं को वा घटिकाद्रिनवनिधिं न भजेत्॥ ३२ ॥

काञ्चनमये स्फुरन्तं कञ्चन घटिकामहीभृतः कटके।
कृष्णमणिमर्घरहितं के वा न विदन्ति कृत्स्नतः श्लाघ्यम्॥ ३३ ॥

संसरणसरणिपान्थास्तापत्रयतरणिकिरणसन्तप्ताः।
आश्वसिता घटिकाद्रौ हरिचन्दनमेत्य शीतलच्छायम्॥ ३४ ॥


www.prapatti.com

मुक्तं निरञ्जनबद्धं मूलं जगतां फलं च घटिकाद्रौ।
आकलयतादद्भुतं महदाकण्ठं मनुजमानने सिंहम्॥ ३५ ॥

पश्यन्ति नयनहरिणाः स्पष्टं घटिकाद्रिलुब्धकं यावत्।
परिसरचरैस्तु तावत् पातकपतगैः पलायितं क्वापि॥ ३६ ॥

विमलमणिहेमकटकं विलसितवनमालमुल्लसन्मौलिम्।
घटिकाद्रिसुहृदमीडे काञ्चनपीतांशुकावृतं प्रांशुम्॥ ३७ ॥

सद्भिः परिगतममलैः संश्रितसर्वंसहं हिरण्यकृतम्।
घटिकाद्रिपं सुमेरुं कलये सर्वोत्तरं सुरैः सेव्यम्॥ ३८ ॥

सरसमविप्लुतवेलं संभृतमणिराजसरसिजाशङ्खम्।
गम्भीरममितममलं गाहे घटिकाचलेश कलशाब्धिम्॥ ३९ ॥

विगततमोग्रहमचलं वृद्धिक्षयरहितमनुदयास्तमयम्।
विकसित मानसकमलं वीक्षे घटिकाद्रिविधुमहो विमलम्॥ ४० ॥

निरवधिकनित्यमहसा निर्मलमुक्तानुबन्ध सुभगेन।
घटिकाद्रिमुकुटभाजा मणिना मम मनसि वारितं तिमिरम्॥ ४१ ॥

अविरलविसृमरसृणिना हरिमणिना सततमाहितौज्ज्वल्यः।
घनकनककल्पितोऽयं कटको घटिकामहीभृतो भाति॥ ४२ ॥

सुमनोभृतेन मधुना सुतरां मधुरेण शुद्धिगुणभाजा।
मम घटिकाचलजनुषा मानसनामा समुत्सुको भृङ्गः॥ ४३ ॥

अणुतरमपि स्वमन्यानर्पयतः सततमाप्तुकामेन।
घटिकाचलप्रणयिना विपुलं विहितं हिरण्यदानमहो॥ ४४ ॥

अननुगुणविषयवीक्षामनिदंप्रथमां सरस्वतीम् मुक्त्वा।
घटिकाचलप्रणयिना घटयति दृष्टिं घनानुरागमयीम्॥ ४५ ॥

दृश्येन दैवयोगात् दीव्यन्महसाञ्जनाद्यतीतेन।
साधयति सिद्धिमखिलां सङ्गो घटिकाद्रियोगिपुरुषेण॥ ४६ ॥



www.prapatti.com

प्रबलैर्ममेन्द्रियाश्वैः परितुष्टो विषमविषयकान्तारे।
पदवीं मनोरथघ्र्यां प्राप्तो घटिकाद्रिपार्थसारथिना॥ ४७ ॥

अतिवेल विलसितोर्मेरवगाहवतामधोगमनहेतोः।
प्राप्तोऽस्मि भवपयोधेः पारं घटिकानियामकेनाहम्॥ ४८ ॥

घटिका यदि गुणघटिता घटिकाचलचक्रिकल्पिता न स्युः।
भवकूपतो जलानां भव्यः को वा समुद्धरणहेतुः॥ ४९ ॥

कलयन्ति ये स्वयात्रां घटिकाचलवैद्यकल्पितेन पथा।
भवरोगतोऽचिरात्ते मुक्ताः स्नानं चरन्ति विरजायाम्॥ ५० ॥

ददतो जगत्युदारान् स्वापेक्षितमर्थमर्थिनः प्राहुः।
आददतः पुनरर्थानुक्ता घटिकाचलार्थिनोदाराः॥ ५१ ॥

दाता हि लोकिकोऽर्थान् स्वव्यतिरिक्तान् ददाति नात्मानम्।
स्वोऽपि स्वसंश्रितेभ्यो दत्तो घटिकाद्रिनृहरिणा दात्रा॥ ५२ ॥

हिंसितदानवकरिणेहृदयगुहाविहितबहुविहाराय।
विक्रमवते सपर्यां विदधे घटिकाद्रिवीरसिंहाय॥ ५३ ॥

श्रुतिपारगाय विद्यासूतिगृहाय स्वधर्मनिरताय।
स्वस्वोचितं प्रदानं सुधियां घटिकाद्रिभूमिदेवाय॥ ५४ ॥

महनीयवृत्तवर्णा महितान्वयवत्यलङ्कृता कृतिना।
सूक्तिसुतनुः प्रदेया शुद्धा घटिकाद्रिसुरवराय शुभा॥ ५५ ॥

गां यो ददाति सार्थां गलदमितप्रेमधारया सहिताम्।
घटिकाचलप्रणयिने घटते किं तस्य काङ्क्षितं नालम्॥ ५६ ॥

कलुषापि घटकवाक्यैः क्षालितवैमुख्यकल्मषा धीषणा।
पृथुगुणभृते मदीया स्पृहयति घटिकाचलप्रियाय भृशम्॥ ५७ ॥

अन्विच्छतान्यमथवा तूष्णीमाध्वं सुरर्षिपितृमुख्याः।
तत्किङ्करोऽर्पितोऽहं तज्ज्ञैर्घटिकाद्रिभूभुजे सचिवैः॥ ५८ ॥

क्रुध्यन्त्यनर्थकं ये गोप्त्रे घटिकामहीभृतो हरये।
मन्ये मन्दधियस्तान् मातङ्गानेव मदजुषः कलुषान्॥ ५९ ॥

दुष्टान् निगृह्य तरसा शिष्टानखिलांश्चिरेण पालयते।
स्वस्ति सुहृदे गुणानां भूत्यै घटिकाद्रि भूभुजे भूयात्॥ ६० ॥

मृदुलं भवाग्निपाकात् व्याप्तं गुणतो विशुद्धमहमन्नम्।
भोज्यं समर्पये स्वं भोक्त्रे घटिकाचलस्य सुस्नेहम्॥ ६१ ॥

नित्यश्रिये गुणानां निधये निष्ठ्यूतनिखिलदोषाय।
प्रज्ञार्पिता मयैषा भर्त्रे घटिकाचलस्य भाग्यवशात्॥ ६२ ॥

पात्रे समाश्रितानां शास्त्रे सत्पुरुषविद्विषां सततम्।
दात्रे सकलफलानां नेत्रे जगतां नमो नृसिंहाय॥ ६३ ॥

सुमनःसमूहभव्यात् शुकमुखसेव्यात् सुशीतलच्छायात्।
घटिकाद्रितटनिरूढात् कल्पकतः कस्य काङ्क्षितं न फलम्॥ ६४ ॥

अविरतहितप्रवृत्तेरापदि सहितादकृत्रिमस्नेहात्।
मम घटिकाचलबन्धोर्मान्यादन्येन केन किं कार्यम्॥ ६५ ॥

घनकरुणामृतपूरैर्घटिकाचलकृष्णमेघतो जनितैः।
पापाटवी प्रदग्धा भजते चित्रं भवाम्बुधिः शोषम्॥ ६६ ॥

गोभिः प्रकाशितार्थात् गोप्तुर्घटिकाभिधानवाद्युदितात्।
जागर्ति सततनिद्रं सवितुर्जगतां मनः सरोजं मे॥ ६७ ॥

रुष्टेन येन रौद्रो रुग्णो धरणिं जगाम शरभोऽपि।
घनदुरितदन्तिनोऽस्माद् घटिकाद्रिहरेः कथं न बिभ्यति मे॥ ६८ ॥

अव्याहत प्रचारादवमत मन्त्रौषधात् सहस्रास्यात्।
पातकमूषकनिवहात् पायात् घटिकाद्रिभोगिनः को वा॥ ६९ ॥

कलितपुरुषार्थसार्थात् घटिकाघटितात् सनातनात् धर्मात्।
किं वा प्रमाद्यतां स्यात् क्षेमं ह्यत्राप्यमुत्र वा पुंसाम्॥ ७० ॥



www.prapatti.com

घनसमयनिर्व्यपेक्षाद् घटिकाचल भूमिभर्तुरुद्भूता।
क्षालयति कलुषमलिनं काचन करुणातरङ्गिणी भुवनम्॥ ७१ ॥

सन्निहितशङ्खपद्मात् सर्वसखात् सकलपुण्यजनसेव्यात्।
घटिकाद्रिराजराजात् का वा न स्यात् समाश्रिता संपत्॥ ७२ ॥

वृजिन विषानलमूर्च्छाविमुषितचित्तान् भवोरगग्रस्तान्।
कुर्वीत लब्धसत्तान् को वा घटिकाद्रिगारुडिकतोऽन्यः॥ ७३ ॥

नित्यान्निरस्तदोषात् नियतपदात् पुण्यकीर्तनश्रवणात्।
विनतोचिताभिधानात् ब्रह्मण एवाधिगम्यते सकलम्॥ ७४ ॥

शुद्धिमुपजनयतोऽग्र्यां स्वालोकेनैव चक्षुषो जगताम्।
घटिकाद्रिमित्रतोऽन्यं कलयेऽखिललोकबान्धवं नाहम्॥ ७५ ॥

अमृतप्रवाहसहजैरालोकैरमलशीतलैः स्नपिताः।
विविधान् भवदवदाहान् विजहति घटिकाद्रिविलसितस्य विधोः॥ ७६ ॥

धर्मोत्तरं द्विपाद्रेः शङ्के घटिकाद्रिमत्र न विवादः।
केनाङ्गीकारि नाऽस्मिन् कृष्णामृगस्यास्य नियतसंवासः॥ ७७ ॥

अमृतार्पणं श्रितानामभिद्रुररसनत्वमार्जवं गमने।
कथमिव च गरुडसख्यं घटिकाचलकृष्णभोगिनो घटते॥ ७८ ॥

आगस्सु संश्रितानामनभिज्ञस्यात्मसाम्यदस्याहम्।
नियमेन सेवकः स्यां नित्यं घटिकाद्रिभूमिपालस्य॥ ७९ ॥

सत्त्वोत्तरस्य दानं सद्भ्यो घटिकाद्रिभूभृतो युक्तम्।
सुतरां पापरतानां युज्येत कथं सुरद्विषां दानम्॥ ८० ॥

घटिकाद्रिकामसुरभेः काङ्क्षापदसकलफलदुहो जगताम्।
मातुर्गवां मयिस्यात् वत्सेबहुलं कथं न वात्सल्यम्॥ ८१ ॥

हन्त न जहत्यमोघामाशिषमायुःश्रियं प्रयुञ्जानाः।
घटिकाचलहरिचन्दनपार्श्वमहीनाः सुपावना हाराः॥ ८२ ॥

सदमृतफलस्य घटिकाशैलरसालस्य सविधगस्यापि।
शब्दादिनिम्बसेवां सन्त्यजति न हन्त हृदयकामो मे॥ ८३ ॥

अमलानुरागसलिलैरभिलाषमलान्यपोह्य सकलानि।
कुसुमैरहिंसनाद्यैः कुर्यां घटिकाद्रिदैवतस्यार्चाम्॥ ८४ ॥

धनदाद्यैरपि न परैः साध्यं सुमहद्भिरण्य दानं तत्।
सुकरेण कृतवतः स्यात् तुल्यो घटिकाद्रिभूभृतः को वा॥ ८५ ॥

जनयत्यवति च सकलान् ज्ञापयति यो हिताहिते शास्त्रात्।
साम्ये तु तस्य को वा ज्ञानी घटिकाद्रि सर्वजनकस्य॥ ८६ ॥

दोषाकरे विरागं सूर्यालोके विकासमामोदम्।
पद्माख्यामपि वहतो युक्तं घटिकाद्रिपस्य केसरिता॥ ८७ ॥

तन्वी मयाद्य लब्धा तपसा विपुलेन भक्तिकन्येयम्।
भजतामव्यभिचारं भावं घटिकाद्रिभर्तरि प्रौढा॥ ८८ ॥

भास्वति सुरासुरगुरौ भोगिनिवन्दारुसौम्य मन्दारे।
घटतामममायघटिते घटिकाद्रिविधौ कथं ग्रहैः पीडा॥ ८९ ॥

समवर्तिनि भुवनेशे पुण्यजने पावके जगत्प्राणे।
श्रीदे शिवेऽपि घटिकाशैलहरौ सति किमन्यदिक्पालैः॥ ९० ॥

यस्योदयः परार्थो यस्यालोकेन यात्यघं विलयम्।
काले च बोधयति यो घटिकामित्रोऽत्र को विरागी स्यात्॥ ९१ ॥

सरसे जाग्रति घटिकाशैलगते सरसिजालये मोहात्।
विरसेषु चित्तनामा विषयक्षुरकेषु विभ्रमति भृङ्गः॥ ९२ ॥

बिभ्रति सदैव लक्ष्मीं विभ्राम्यति मित्रमण्डले विदुषाम्।
घटिकाद्रि सार्वभौमे घटते किं वा न संश्रिताभिमतम्॥ ९३ ॥

श्रितघटिकाचलशिखरे स्थिरकरुणापूरनिर्भरे शिशिरे।
दीव्यन्ति विमलपक्षा दिव्ये कमलालये चिरं हंसाः॥ ९४ ॥

विहरति बहुगुणजाले वीरे घटिकाद्रि कृष्णवर्त्मनिभे।
विजहति समस्ततापान् विजयन्ते मृत्युमपि विमोहमहो॥ ९५॥

कनकमयकटकशोभां कलयति घटिकामहीभृतो रुचिरे।
दीप्तिमति कृष्णरत्ने दृष्टे त्रासलवमनुभवेत् को वा॥ ९६॥

सप्तर्षिसेव्यमाने सन्ततसुमनस्कृते सहस्राक्षे।
रमतां मनो हरौ मे राजति घटिकाद्रि रत्नसानुतटे॥ ९७॥

पादस्पर्शनविभवात् पावितभुवने प्रबोधितात्मगुणे।
भजति घटिकाद्रिमित्रे भगवति भावं मनःसरोजं मे॥ ९८॥

तुष्टेऽल्पतः सुशीले सुगुणगृहीते सुलक्षणे सुदृढे।
आरोपितो मदीयो भद्रे घटिकाद्रि धूर्वहे भारः॥ ९९॥

अननुगुणामपि वाणीमागः सन्दोहमन्दमति कलिताम्।
अङ्गीकरोतु भगवान् आश्रितदोषावलोकनाकल्यः॥ १००॥

स्वामिन एव कृतिर्मे सूक्तिस्तोषाय तदपि तस्यैषा।
स्वोक्तमनुवदति बाले सुतरां तातो हि तोषमुपयाति॥ १०१॥

भक्तोचितोपयुक्तां भक्त्यां सौम्यवर किङ्करोपहृताम्।
अमृतफलावलिमनघां मृदुलामास्वाद्य मृत्युमतियन्ति॥ १०२॥

॥ इति अमृतफलावलिशतकं सम्पूर्णम्॥

www.prapatti.com